राज्ञीपंचांग

नं. १५८३

नं ५३५

नं १५ [illegible]

श्री [illegible]

इद [illegible]

५७४।

३१

सं० १९ [illegible]

पूर्ण

एत्तीपंचाग

रा॰
प॰
१

ॐ श्रीगणेशाय नमः ॐ नमो म
हागणपतिभगवते ॐ श्रीशैलशि
खरासीनं भगवन्तमुमापतिम्
चन्द्रार्धकृतशेखरं देवं सूर्यसोमा
ग्निलोचनम् गजचर्मपरीधानं
विरूपाक्षं सुराधिपम् गणग
न्धर्वयक्षेन्द्रदेवासुरनमस्कृतं
विहसन्तं जपन्तं वपठन्तं वसु
कृत्कृः इत्यापविमलाम्भूत्वाप
र्यपृच्छत भैरवी श्रीदेव्युवाच
भगवंस्त्वपरो देवः सुरासुरन
मस्कृतः गुणिवेदांगतत्त्वज्ञो
गुणातीतश्चिदीश्वरः सन्ततं
किं जपस्याद्यनन्त्वं सर्वोत्तमवि
भो: श्रद्यापि विदितं यन्मेतत्त
त्त्वं वक्तुमर्हसि श्रीभैरव उवाच

यादेवीनिष्कलाशान्तानिराभासा
निरञ्जना महाश्रीषोडशीविद्या
साराज्ञीतिनिगद्यते सकलाराज्य
दालोकेविद्याराज्ञीमहेश्वरी दे
वीपंचदशीसैवपरंब्रह्मलिङ्गंविनि
न्त्रणंदारिद्र्यनाशायप्रादुर्भूता,ध
मारते तस्याःपंचदशीविद्याग्रं
लामविदितोपराम् तांजपामि
महाविद्यातसैवांगसरास्पदम्
श्रीदेव्युवाच भगवन्करुणाम्भोधे
शरणागतवत्सल यादेवीलो॰
कमातेतिराज्ञीराज्यप्रदायिनी
दारिद्र्यहारिणीत्युक्ततस्यांगं
भजस्वमे तत्वतोवदतंत्राछ्रय
थंस्प्रियसीतव श्रीभैरवउवाच
श्रणुश्वावहितोभूत्वापटलंमे

नविग्रहम् राज्ञ्याः सर्वसम्भूतमेर
हस्यं देवदुर्लभम् मंत्रोद्धारमहादे
वि राज्ञ्याः महदनोदितम् कृत्वा
गोपयेद्यत्नेन येन सिद्धिः प्रजायते
तारं मायामनलः शक्तिकामौ म
थ्येवाग्भवमगवश्चैवराज्ञे माया
बीजं ठद्वयं देवि राज्ञ्या मंत्रोद्धारो व
र्णितो गोपनीयः नास्मान्तराधो
नोक्तेशेन विपर्ययभोः शिवे स
र्वसिद्धिप्रदो देवि मंत्रोयं भाग्यवर्ज
नः मंत्रमुत्कीलयेदादौ ततः सं
जीवयेत्मनुम् सिद्धं मंत्रं जपेद्दे
वि ततः संपुटितं चरेत् ततो मंत्री
यमीशानि साक्षात्सिद्धिप्रदो भवे
त् यंत्रोद्धारं प्रवक्ष्यामि सर्वाशा
परिपूरकम् सर्वकार्यसाधकं च

कं सर्वसंमोहनं तथा विद्वेष
णं मंत्रयंत्रं च हृत्ताष्टदलमा
लितम् हृत्तत्रयधारासप्रा
न्वीश्रीचक्रमीरितम् लयाङ्ग
म* स्पर्द्धवेष्टिम्प्रण्ये वेदागमो
हृतम् येन श्रवणमात्रेण प्र
जाप्तफलं लभेत् गणेशो
भीमराजश्च कुमारो जगले
श्वरः इन्द्राद्या लोकपालाश्च
पूजनीयाश्च भूपते वृत्तत्रये
भार्गवनीयाश्च रूपंक्तित्रये पि
वे वासुकिर्नीलनागश्च त
तकः पद्मनागकः पूर्वादि
दिक्षु संपूज्या विदिक्षु च पा पि॰
वेति कार्कोटकः शंखपालः
कुलिकः शेषश्चैव आग्नेय

ग्र॰ प॰ ३

3

क्रमतः पूज्या ब्राह्म्याद्या मातरस्त
था भैरवाश्चाष्टसंपूज्या वामभाव
नेन पार्वति ब्राह्मी चैव वैष्णवी चै
व रुद्राणी चापराजिता कौमा
री चैव चामुण्डा वाराही नारसिं
हिका असिताङ्गो रुरुश्चण्डः
क्रोधीशोन्मत्तभीषणाः कपा
लेशश्च संहारः पूजनीया यथा
क्रमम् श्रीदुर्गा शारिका देवी
वैत्वरी च शिवापि वै कालि
का त्रिपुरा पूज्या वाममार्गमाग
उग्रके लक्ष्मीः सरस्वती बा
ला पूजनीया त्रिकोणके बि
न्दौ राजप्रदा राज्ञी विद्या पञ्च
दशाक्षरी भूतेश्वरं शिवं देवि
विघ्नपं संसमर्चयेत् कलशं

वक्ष्याम्यांत्र पूजयेद्धृदंकं ततः यो
गिनीद्वेत्रपात्रं लक्ष्ममूर्तीस्तत्र विनाय
कम् शमेश्वरं महेशानि लयागमि
दमीरितम् श्रीं ह्रीं मूलमन्त्रस्य
ब्रह्मा ऋषि[illegible] समीरितः गायत्रं
छन्द ईशानि ह्रीं देवी च देवता ।
मायाबीजं शरच्छक्तिः कामः की
लकमीश्वरि भोगापवर्गसिद्ध्य
र्थे विनियोगः प्रकीर्तितः ध्यान
मस्याः प्रवक्ष्यामि सात्त्विकं काम
नाप्रदम् सर्वसिद्धिप्रदं देवि मन्त्र
कोटिफलप्रदम् ॐ उद्यद्दिवाक
रसहस्रकरविं त्रिनेत्रां सिंहासनो
परिगतां त्रिगोपवीताम् । विद्रु
द्वेनाद्रकलशामतनपात्रहस्तां ऐं
ह्रीं भजामि विकसद्दनारविन्दा
म् ॥

श्रुणु नादेवि वक्ष्यामि प्रयोगानद्भुतत्व
त: येन साधनमात्रेण मंत्र: कल्पद्रु
मो भवेत् स्तंभनं मोहनं वै च मारणं,
कर्षणं प्रिये वशीकारं तथोच्चा
टं शान्तिकं पौष्टिकं तथा येनैव सा
धनेनैव सप्रयोगाणां महेश्वरि र
वौ स्नात्वा जपेन्मन्त्रं श्मशाने भूत
संख्यया कृष्णेष्ठितानां लेसर्पिमा
लिनीके शाम्सज्वचं स्तंभनं जाय
ते कादिचन्द्रवातार्कपाद्यसंभ्र ।
रवौ तत्र श्मशानस्थ: शिववेश
यत: सुधी: जपेन्मन्त्रायुतं सम्य
क् कुर्याद्धोमं दशांशत: हुतवान्नी
र शाल्वाभिलंवैगौरीहूनं भवेत् र
भौमे गत्वा श्मशानं च चितायां स
जपेन्मन्त्रम् कृष्णेन दशांशत: स

श्री

पिष्टीनकएहकणीमयम् शत्रुः
कालसमानोपिमृत्युमेष्यतिक
र्वेति ३ रवौश्मशानेदेवेशि जपे
न्मंत्रमयुतंनिशि कृतेदाज्यदशां
शेनसचण्डालकर्थप्रिये रंभाति
लोत्तमावापिप्रातःप्रादुर्भविष्यति ४
रवौजपेन्मंत्रंदेविश्मशानेमृतकऊ
न्तलः अयुतंतद्दशांशेनकृतेदा
ज्यसपायसम् सर्षपंरचनसारंच
भूमध्यंयातिवासवः ५ भौमेश्म
शानेदेशेतुजपेदयुतसंख्यया
दिगंबरोमृतकेशोकृतेदाज्यंच
सोल्मुकम् सहूर्वांशकंरकृतारि
११मारयिष्यति ८ रवौश्मशा
नेनिलयेजपेद्राज्ञीमंत्रंसुधीः
अयुतंतद्दशांशेनकृतेदाज्यंशंभु रि

गा॰

प मू॰ कं समेबलिहृद्वारं वशमयेदसितं भ
९ मू॰ यं ९ स्वोश्मशाने सजप्यमूलं वा पुन
संख्यया कृत्वैकं पितमांसासमा॰
ह्रिंधपलमहिजे पितृणांदेवतानां
वश्रुष्टिदोयंप्रयोगकः ८ इतेबब
टलेगस्यासर्वागमरहस्यवान्‌ अ
स्मशिष्यायनोदेयोदुर्जनायविशे
षतः गुरुभक्तिविहीनाय कुचैला
यदुरात्मने अभक्तेभ्योपिपुत्रेभ्यो
दत्तानिरयमाप्नुयात्‌ देयंशिष्याय
शान्ताय गुरुभक्तायधाविति दी॰
क्षिताय कुलीनाय रात्रीभक्तिरता
यच इदंरहस्यंपरमंतत्वमभ्याम
योदितं गुह्यगोप्यतमंलोकेगोप॰
नीयंस्वयोनिवत्‌ इति रुद्रयामलेतं
त्रेदशविद्यारहस्ये श्रीराज्ञीपटलःस
मासः

ॐ श्रीगणेशाय नमः ॐ ब्राह्मे मु
हूर्ते चोत्थाय स्वशिरसि सहस्रार
पद्मे मुखकमलकर्णिकान्तर्गत
निजगुरुं द्विभुजं द्विनयनं वराभ
यकरं शुक्लवर्णं शुक्लालंकारभू
षितम्‌ स्ववामेष्टेनोत्पलया स्व·
शक्त्या दत्तभुजेनालिंगितं सक
लदेवदेवं मानानन्दसदाशिवं ज्ञा
नांमं पूजयेत्‌ दण्डवत्प्रणमेत्‌
ॐ नमामि सद्गुरुं शान्तं प्रत्यक्षं शि
वरूपिणम्‌ शिरसा योगपीठ·
स्थं मुक्तिकामार्थसिद्धये १ अ
ज्ञानतिमिरान्धस्य ज्ञानाञ्जन
शलाकया चक्षुरुन्मीलितं ये
न तस्मै श्रीगुरवे नमः २ अख
ण्डमण्डलाकारं व्याप्तं येन चरा

चरम् तत्पदंदर्शितंयेनतस्मैश्री
गुरवेनमः ३ गुरुर्ब्रह्मागुरुर्वि
ष्णुर्गुरुःसाक्षान्महेश्वरः येगुरुः
सर्वदेवानांतस्मैश्रीगुरवेनमः ४
ॐनमस्तेनाथभगवञ्छिवायगुरु
रूपिणे विद्यावतारसंसिद्ध्यैस्वी
कृतानेकविग्रह १ नवायनव
रूपायपरमार्थैकरूपिणे सर्वा
ज्ञानतमोभेदभानवेचिद्घनायते
स्वतंत्रायदयाक्लृप्तविग्रहायचि
दात्मने परतंत्रायभक्तानांभव्या
नांभव्यरूपिणे ज्ञानिनांज्ञानरू
पायप्रकाशायप्रकाशिनां विवे
किनांविवेकायविमर्शायविमः
र्शिनाम् भासामाधिपोः २ ॐ
नमस्कुर्यामपर्ययः सदामसि

ग
ह
२

त्वद्रूपेण विधेहि भवदासमनन्तम् त्व
त्प्रसादादहं देव कृतकृत्योस्मि स
र्वदा मायामस्य महामस्य शोढि मु
क्तोस्मि शिवोस्म्यहम् इति श्रीयु
क्तेश्वरणम्यतस्य समन्त्रविभाग्य मन्त्रः
मातदाज्ञां गृहीत्वा गोह्यावगोहक
मेणकुंडलिनी प्रबोध्य तंपस्मा·
प्यसमर्प्य विद्यां निःकृयान प्रातःप्र
भृति सायान्तं सायादि प्रातरन्ततः
यत्करोमि जगन्नाथ तदस्तु तव·
पूजनम् जानामि धर्मं न च मे प्र
वृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः
त्वयाहृषीकेशिहृदिस्थयाहृदय·
थ्यानियुक्तोस्मि तथा करोमि ॥ ॥
संसारयात्रामनुवर्तमानंश्रीस्वन
तिनस्मरणान्नयेव स्पर्धातिरक्षा

रकलिप्रमादभयानि मां माभिभव
न्तु मातः इति समभ्यर्च्य प्रार्थ्य
येत् समुद्रमेखले देवि पर्वतस्त
नमण्डले विष्णुपत्नि नमस्तुभ्यं
पादस्पर्शं क्षमस्व मे इति स्वश्वासा
नुसारेण भूमौ पादं निदध्यात् उ
त्तिष्ठन्तु महाभूता ये भूता भुवि सं
स्थिताः मलमूत्रं करिष्यामि म
महाघोरा नदी यते [इति] तालत्रयं दत्वा म
लमूत्रं त्यजेत् करचरणौ प्रक्षाल्य स
मूलेन शुद्धं विप्रक्षाल्य ॐ मणिधरि
वज्रिणि महाप्रतिसरे रक्ष रक्ष हुं
फट् स्वाहा इति शिखां बद्ध्वा आच
मनत्रयं कुर्यात् मूलं आत्मतत्त्वं
शोधयामि स्वाहा मूलं विद्यातत्त्वं
शोधयामि स्वाहा मूलं शिवतत्

रा॰ पू॰ १ 3

संशोधयामि स्वाहा मूलेन मलस्ना
नं कुर्यात् ततः गंगे च यमुने चैव
गोदावरि सरस्वति नर्मदे सिंधु का
वेरि जलेऽस्मिन् सन्निधिं कुरु इति
तीर्थान्यावाह्य त्रिरुन्मज्जेत् ततस्त्रि
राचम्य प्राणायामं कृत्वा वामह
स्ते जलं गृहीत्वा सप्तेनाच्छाद्य हं
यं वं रं लं इति त्रिः गलितबिन्दुभिः
सप्तधा शुद्ध्या स्वशिरसि समयाभ्यु
क्ष्य इडया कृष्णवर्णं पापपुरुषं
स्प पिंगलया विरि[illegible] कं जलत्र ध्य
मज्ज्याल्वा पुरः कल्पितवज्रशिला
यां फडिति निक्षिपेत् इत्यघमर्ष
णं विधाय ॐ राज्ञ्मैदयै विद्महे ह्रीं
पंचदशाहार्यै धीमहि श्रीं तन्नो गौरी
देवि प्रचोदयात् ३ ततो जलं यंत्र

विभागे ईशाने श्रीमच्छ्रीश्रस्तु·
कानन्दनाथं तर्पयामि नमः आ
ग्नेये परमगुरुं नैरृते परमेष्ठि·
गुरुं वायव्ये परापरगुरुं तर्प
यामि नमः मध्ये गुरुपत्नीं तर्प
यामि नमः ततो देवर्षिपितॄन्तर्प·
णि। सांगे सवाहने सायुधे सपरि·
वारे सानुचरे मातः श्रीशारदे न
मस्ते तामिति सप्तवारं सन्तर्प्य
गायत्र्यास्तुष्ट्यर्घ्यत्रयं दद्यात्
ततो हस्ताभ्यां नम द्वारदेशे द्वार
देवताभ्यो नमः इति द्वारं प्रेक्ष्य आ
सनं शोधयेत् अस्य श्रीआसन प्रो
मन्त्र मंत्रस्य मेरुपृष्ठ ऋषिः सुतलं
छन्दः कूर्मो देवता आसनशो
धने विनियोगः ह्रीं पृथिव्यै नमः

रा॰
पू॰ इति संप्रार्थयेत् पृथ्वि त्वया धृता
४ लोका देवि त्वं विष्णुना धृता त्वं च धार
य मां देवि पवित्रां चासनं कुरु आधा
रशक्तिकमलासनाय नमः अपस
र्पन्तु ते भूता ये भूता भुवि संस्थिताः
ये भूता विघ्नकर्तारस्ते नश्यन्तु शि
वाज्ञया इति तर्जनीमध्यमाभ्यां
तालत्रयं दत्वा पार्ष्णिघातत्रयं दि
पं॰ व्य दृष्ट्या दिव्यविघ्नानुत्सार्य छो
टिकाभिर्दशदिग्बन्धनं कृत्वा चा
त्मानं वह्निप्राकारं ध्यात्वा गुरुं
ध्यायेत् गुरुत्रेलिति गुरुभ्यो न
मः परमगुरुभ्यो नमः परमे
ष्ठिगुरुभ्यो नमः परापरगुरुभ्यो
नमः ॐ अस्य श्रीराज्ञीविद्यामन्त्र
स्य ब्रह्मा ऋषिः गायत्री छन्दः

श्रीराज्ञीभगवतीदेवता ह्रींबीजं
श्रौंः शक्तिः क्लींकीलकम् श्री
राज्ञीदेवीप्रीत्यर्थे पूजायांजपेहो
मे विनियोगः ब्रह्मर्षये नमः
शिरसि गायत्रीछन्दसे नमो मुखे
राज्ञीदेवतायै नमो हृदये ह्रींबीजा
य नमो नाभौ श्रौंः शक्तये नमो गुह्ये
क्लींकीलकाय नमः पादयोः जपे
विनियोगः सर्वांगेषु ॐ रां अंगुष्ठा
भ्यां नमः ॐ रीं तर्जनीभ्यां नमः ॐ
रूं मध्यमाभ्यां नमः ॐ रैं अनामिका
भ्यां नमः ॐ रौं कनिष्ठिकाभ्यां नमः
ॐ रः करतलकरपृष्ठाभ्यां नमः
ॐ रां हृदयाय नमः ॐ रीं शिरसे स्वा
हा ॐ रूं शिखायै वषट् ॐ रैं कव
चाय हुम् ॐ रौं नेत्रत्रयाय वौषट्

रा
९
५

ॐ रः अस्त्राय फट् ततो भूतशुद्धिः
ॐ ह्रीं मूलाधारात् कुंडलिनीं प्रदीप
कलिकाकारां सुषुम्णामार्गेण ब्र
ह्मरंध्रान्तं नीत्वा परमशिवं प्राप
प्य नयेः सामरस्यं विभाव्य तदुद्भू
तयामृतधारया कुलकुण्डं नीत्वा
मूलाधारे स्थापय्य वामकुक्षौ पा
पपुरुषं अंगुष्ठमात्राकारं कृष्णवर्ण
रक्तश्मश्रुलं ब्रह्महत्याशिरस्कं स्व
र्णस्तेयभुजं हृयं सुरापानहृदयं
गुरुतल्पकटिद्वयं तत्संस
र्गिपदद्वन्द्वं अंगप्रत्यंगपातकं उप
पातकरोमाणं रक्तश्मश्रुविलो
चनं ध्यात्वा यं १६ रं १६ वं १६
लं १६ दिव्यदेहं ध्यात्वा प्राणप्रतिष्ठां
कुर्यात ॐ ह्रीं श्रीं क्रों सोऽहं हंसः म

मम प्राणा इह प्राणाः ॐ मम जीव इ
ह स्थितः ॐ मम सर्वेन्द्रियाणि इ
ह स्थितानि ॐ मम वाङ्मन
श्चक्षुः श्रोत्र जिह्वा घ्राण प्राणा
इहागत्य सुखं चिरं तिष्ठन्तु स्वा
हा ॐ १८ ॐ १८ ॐ ३२ आत्म
तत्त्वं शोधयामि नमः विद्यातत्त्वं
शोधयामि नमः शिवतत्त्वं ।
शोधयामि नमः इत्याचम्य न्या
सं कुर्यात् ॐ नमः ब्रह्मरन्ध्रे ।
ह्रीं नमः शिरसि श्रीं नमः नेत्र
योः रां नमः कर्णयोः क्लीं न
मः नासाग्रे सौः नमः मुखे ऐं
नमः कण्ठे गं नमः भुजयोः
वं नमः वक्षसि सैं नमः कुक्षौ
रां नमः नाभौ ह्सौं नमः गुह्ये ।

रा॰ पू॰ ८

ह्रीं नमः जान्वोः ह्रैं नमः जंघ-
योः ह्रौं नमः पादयोः मूलं स-
र्वांगेषु ततः कामकलारूपस्या-
त्मानं ध्यात्वा हृत्कर्णिकायां
मूलेश्वराङ्कोपगतां श्रीदेवीं ध्या-
त्वा मानसोपचारैः सम्पूज्य ॥
ततो वहिः श्रीचक्रमपि यथा-
विधिमापूजयेत् विन्दुत्रिको-
णषट्कोणाष्टदलत्रिवृत्तभू-
गृहमयं कृत्वा योगपीठं पूजा-
समावेन तद्यथा मूलं अं आं
ऋं ॠं इं ईं उं ऊं ऌं ॡं एं ऐं ओं औं अं अः
कं खं गं घं ङं चं छं जं झं ञं टं ठं डं
ढं णं तं थं दं धं नं पं फं बं भं मं यं रं
लं वं शं षं सं हं ळं क्षं श्रीमहारा-
ज्ञीयोगपीठाय नमः इति स-

सतो

इत्य सामान्यार्घ्येन कुर्यात ततो हृदय
कमलाद्भूतेश्वरांकोपविष्टां श्रीरा
ज्ञीभगवतीं हृत्कुमण्डली मनावहिरानीय
श्रीचक्रविन्दुपीठेपरिसंस्थाप्य
तत्रावाहनादिमुद्राः प्रदर्श्य खेच्छा
पद्मकलशामृतपात्रमुद्राः प्रदर्श्य
मूलेनप्राणप्रतिष्ठामन्त्रेणप्राणा
न्दत्वा मूलं श्रीभूतेश्वरभूतेश्व
रीभ्यांपाद्यंनिवेदयामिनमः आ
र्घ्यं आचमनीयंमधुपर्कं पुनरा
चमनीयं गन्धं अक्षतं पुष्पं नि
वेदयामिनमः मूलं नैवेद्यं आ
चमनीयं ताम्बूलम् निवेदयामि
नमः मूलेनेति ततः षडङ्गं कृत्वा
श्रीचक्रं पूजयेत ओं ह्रीं सर्वाशापा
रकाय चक्रायनमः इति पुष्पा

स्नानं

गा॰ पू॰ ७

अलिंटत्वा ॐ ह्रीं गणेश्वरपादुकां
पूजयामि नमः पूर्वे ॐ ह्रीं मे श्री
महाराजपादुकां पूजयामि नमः द
क्षिणे ॐ ह्रीं ह्रीं कुमारपादुकां पू
जयामि नमः पश्चिमे ॐ ह्रीं श्रीं
जांगलेश्वरपादुकां पूजयामि न
मः उत्तरे ॐ ह्रीं इन्द्रश्रीपादुकां
पूजयामि नमः ॐ धर्मराजश्रीपा
दुकां पूजयामि नमः ॐ निर्ऋति ह्रीं
श्रीपादुकां पूजयामि नमः ॐ व ह्रीं
रुणश्रीपादुकां पूजयामि नमः
ह्रीं ॐ वायुश्रीपादुकां पूजयामि न
ह्रीं मः ॐ कुबेरश्रीपादुकां पूजया
ह्रीं मि नमः ॐ ईशानश्रीपादुकां पू
ह्रीं जयामि नमः ॐ ब्रह्मश्रीपादुकां
पूजयामि नमः वामावर्तेन पूर्व
ॐ ह्रीं अनन्तश्रीपादुकां पूजयामि नमः न॰ इति

ज्म इति प्रथमावरणम् १ त्रिकोणे
ॐ ह्रीं गुरु श्रीपादुकां पूजयामि न
मः ॐ ह्रीं परमगुरु श्रीपादुकां
पूजयामि नमः ॐ ह्रीं परमेष्ठिगु
रु श्रीपादुकां पूजयामि नमः ॐ
ह्रीं परापरगुरु श्रीपादुकां पूजया
मि नमः इति द्वितीयावरणम् २
ॐ ह्रीं सर्वार्थसाधकचक्राय नमः इति संपूज्य
ॐ ह्रीं वासुकि श्रीपादुकां पूजया
मि नमः नीलनाग श्रीपादुकां पू
जयामि नमः तक्षक श्रीपादुकां
पूजयामि नमः पद्मनाग श्रीपा
दुकां पूजयामि नमः कार्कोटक
श्रीपादुकां पूजयामि नमः शंख
पाल श्रीपादुकां पूजयामि नमः
कुलिक श्रीपादुकां पूजयामि नमः

ग. ॐ ह्रीं
९· अनन्तनागश्रीपादुकां पूजयामिन
८ मः इतिस्तनीयावरणम् ३ ॐ ह्रीं
असितांगभैरवयुत ब्राह्मीश्रीपादु
कां पूजयामिनमः ॐ रुरुभैरवयु
तवैष्णवी श्रीपादुकां पूजयामिन
मः ॐ चण्डभैरवयुतरुद्राणी श्री
पादुकां पूजयामिनमः ॐ कपा
लेशभ्युत अपराजिताश्रीपादुकां पू
जयामिनमः ॐ क्रोधेशयुतकौ
मारीश्रीपादुकां पूजयामिनमः
ॐ उन्मत्तभैरवयुतचण्डिकाश्री
पादुकां पूजयामिनमः ॐ भीषण
भैरवयुतनारसिंही श्रीपादुकां पूजया
मिनमः ॐ संहारभैरवयुतनारसिं
ही श्रीपादुकां पूजयामिनमः तद्
निचतुर्थावरणम् ४ ॐ ह्रीं सर्व

सिद्धिप्रदा ॥ श्रीचक्रायनमः ॐ ह्रीं
दुर्गा श्रीपादुकांपूजयामिनमः ॐ
ह्रीं शारिका श्रीपादुकांपूजयामिन
मः ॐ ह्रीं वैखरी श्रीपादुकांपूजया
मिनमः ॐ ह्रीं राज्ञिका श्रीपादुकांपूज
यामिनमः ॐ ह्रीं कालिका श्रीपा
दुकांपूजयामिनमः ॐ ह्रीं त्रिपु
रा श्रीपादुकांपूजयामिनमः ॥ इ
तिपंचमावरणम् ५ ॐ ह्रीं लक्ष्मी
श्रीपादुकांपूजयामिनमः ॐ ह्रीं
सरस्वती श्रीपादुकांपूजयामिन
मः ॐ ह्रीं बाला श्रीपादुकांपूजया
मिनमः ॥ इतिषष्ठावरणम् ॐ ह्रीं
सर्वानन्दमयायचक्रायनमः मू
ले स्वप्रकाशरूपाय श्रीमूलेश्वर
मूलेश्वरी श्रीपादुकांपूजयामिन

ग०
भू०
५

पयामि नमः मूलं श्रीभगवतीश्री
राज्ञीश्रीपादुकां पूजयामि तर्पयामि
नमः मूलं श्रीराज्यप्रदाश्रीपादुकां
पूजयामि तर्पयामि नमः मूलं पञ्च
दशाक्षरी श्रीपादुकां पूजयामि तर्प
यामि नमः मूलं भूतेश्वरश्रीपादु
कां पूजयामि तर्पयामि नमः मूलं
ल्हडू श्रीपादुकां पूजयामि तर्पया
मि नमः मूलं पद्मश्रीपादुकां पूज
यामि तर्पयामि नमः मूलं कलश
श्रीपादुकां पूजयामि तर्पयामि न
मः मूलं खयापात्रश्रीपादुकां पू
इति संपू जयामि तर्पयामि नमः मूलं भू
न्यासं तर्प तेश्वरभूतेश्वरीभ्यां गन्धाक्षतपु
ष्पाणि धूपं दीपं नैवेद्यं आचमनी
यं ताम्बूलं छत्रं चामरं आरात्रि

निवेदयामि नमः

क्लीं निवेदयामि नमः ततोवलिः
ॐ ह्रीं देवीपुत्र वटुकनाथ कपिला
जटाभारभास्वर त्रिनेत्र ज्वालामुख
इमां वलिं गृह्ण गृह्ण गृह्णापय
मम वांछितं सिद्धिं देहि देहि स्वा
हा इति दद्वलिं ॐ यां यीं यूं योगि
नीगणेभ्यो नमः स्वाहा उत्तरे ॐ
ह्रीं हां ह्रीं ॐ श्रीं ह्रीं क्षेत्रपाला
यसोमेस्वराय वौषट् पश्चिमे ॐ
गं ग्लौं गणपतये नमः पूर्वे इति व
लिं निवेद्य षडंगं कृत्वा देवीं ध्या
त्वा ॐ अक्षमालायै नमः ॐ मा
ले माले महामाले सर्वशक्तिस्व
रूपिणि चतुर्वर्गस्त्वयि न्यस्ता
स्तस्मान्मे सिद्धिदा भव अवि
घ्नं कुरु माले त्वं दक्षहस्ते गृह्णीमा

गु॰ १॰ ८॰

जपेत् ततोजपंसमाप्य मालांसमा
य ॐसिद्ध्यैनमः शिरस्थाप्य त्वं सं॰
मालेसर्वदेवानां जननीशुभदाम
ता शुभंकुरुष्वमेभद्रेयशोवीर्यंच
देहिमे ततोजपनिवेदनम् गुह्या
तिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंज
मू॰ पं सिद्धिर्भवतुमेदेवित्वत्प्रसादान्म
इति॰ हेश्वरि देवीवामहस्तेसमर्प्य पा
ठंकृत्वा प्रातःप्रभृतिसायान्तंसा
यादिप्रातरन्ततः यत्करोमिजगद्यो
नेस्तदस्तुतवपूजनम् इतिपुष्पांजलिं
निवेद्य योनिमुद्रांप्रदर्श्य संहारमुद्र
यादेवदेवीपुष्पेणसहआघ्राणमार्गे
णहृत्कर्णिकापीठेसंस्थाप्यदेवीरू
भिति॰ पोहंध्यात्वा स्वशक्त्यासहसुखे॰
विहरेत् इतिपूजाविधिः समाप्तः

रा
क॰ ॐ श्रीगणेशाय नमः अथ कवचम्
१ श्रीभैरव उवाच ॐ शृणु देवि प्रवक्ष्या
मि राज्ञीकवचमुत्तमम् त्रैलोक्य
नाम विजयं दिव्यं भोगापवर्गदम् मूल
मन्त्रमयं साध्यं महासिद्धिप्रदायकम्
सर्वैश्वर्यप्रदं लोके सर्वागमविनि
श्चितम् पठनाद्धारणाद्देवि महा
पातकनाशनम् महोत्पातप्रश
मनं मूलविद्यामनोहरम् विरू
पाक्षः शिवो देवि विष्णुर्नारायणो
बली ब्रह्मा पितामहो लोके जि
ष्णुर्गीर्वाणनायकः महोदधिस्त
थामूर्धस्तारकाधिपतिः शशी
रत्नाकरश्च जलधिः शेषश्चानन्त
तां गतः श्रीराज्ञीकवचस्यास्य
पठनाद्धारणात्सदा वरुणोऽकेन

किं देवि कवचस्यास्य धारणात् मर्त्या
प्युमरतां याति राज्ञीपद्ममवाप्नुयात्
ऋषिरस्य महादेवि ब्रह्मा छन्दः स
मीरितम् गायत्र्यं देवता राज्ञी मा
याबीजमुदीरितम् शरच्छक्तिः
कीलकं च कामराजस्त्रेश्वरि भो
गापवर्गसिद्ध्यर्थे विनियोग इतिस्मृ
तः ॐ लक्ष्मीर्मे शिरः पातु ह्रीं ल
लाटं सरस्वती श्रीं बाला पातु मे ने
त्रे मे भ्रू पातु श्रुती मम रं दुर्गा मा
तु मे नासां क्लीं मुखं पातु शारिका
सौः कण्ठं वैखरी पातु मं भुजौ पा
तु मे शिवा गं हस्तौ पातु मां काली
वक्षस्त्रिपुरावतु घडं श्रुपातु मे
मध्यं रह्नं पार्श्वौ सदावतु सें ष्ह
पातु मे ब्राह्मी रं नाभिं पातु वैष्णवी

रा. क १

ऐंरुंऐपात्ररुद्राणीह्रींकटिंसुरपराजि
ता ह्रांकौमारीपात्रजानू ह्रां जंघेव
नचण्डिका ह्रांह्रांग्लैंकोचवारा
हीऊंपादौनारसिंहिका विस्मा
रितंचयत्स्थानंयत्स्थानंनामवर्जि
तम् तत्सर्वपात्रभैरवीमूलवि
द्यामयीपरा वासुकिःपूर्वतःपा
तुनीलनागान्लेखतान् तक्षको
दक्षिणेपात्रंनैर्ऋतेपद्मनागकः
कर्कोटकःपश्चिमेशंखवपालो
निलेवतात कुलिकश्चोत्तरेपात्र
शेषईशानमण्डले ब्राह्मीब्राह्मे
मुहूर्तेमादिनादौवस्नवीमम रु
द्राणीपात्रमध्याह्नेसायंपात्रवैष्ण
वीनिना निशार्द्धेपात्रकौमारी
निशीथेचण्डिकाचतु निशान्ते

पातु वाराहो सर्वदा नारसिंहिका ॥
श्रक्षितानाः हितेपातु हृत्सर्मां पातुपा
थसः चण्डोमांपवनात्मातुक्रोधे
षाः पातु मातुलात् उन्मत्तः सोम
नः पातु भीषणः सूर्यनेवतु याज
काद्भ्रुकपालेशोऽग्नेमः संहारको
वतात् सदाममनन्तः पातु वपु
र्विष्टदलंमम गुरवः पातु सर्वत्र
दिग्गीशाः पातु सर्वतः शूलत्रयं पातु
निर्मयरागोदं सदावतु श्रीमत्कं पा
तु भीतिभ्यः योगिनः पातु सर्वतः
दुर्धनाथः सदा पातु देवो राजेश्वरः
शिवः सर्वत्र सर्वदा महोवपुर्भूते सं॰
भ्यो वतात् पादादिमूर्धपर्यन्तं व
पुः सर्वत्र सर्वदा शिरसः पादपर्य मेरतु॰
न्तं राज्ञी पंचदशाक्षरी रक्षेदेकव
॥ नी॰

रा॰
क॰ वंगात्राः सर्वगर्भजं यावद्दशम् त्रैलोक्य
१ विजयं नाम दारिद्र्यभयनाशनम् स
र्वसौख्यप्रदं नित्यं सर्वापद्विनिवारणं
3 सर्वरोगहरं सद्यो त्रिसिद्धिं पापना॰
शनम् महाभयहरं देवि मूलवि॰
द्यामयं परम् परमार्थप्रदं नृणां
भोगमोक्षैककारणम् यः पठेत्क
वचं देवि रणे राजभये तथा संग्रा
मे पुरि पुच्छिन्ना विजयी शत्रुमेघा॰
ति पठनात्कवचस्यास्य राजकोपः
प्रशाम्यति श्रुते यंत्रलेखे हृत्वीश्म॰
शाने सिद्धिमाप्नुयात् त्रिवारं यः प
ठेद्रात्रौ रतः स्नात्वेमरेश्वरि तस्या॰
विसे॰ राज्ञी महाविद्या राज्ञी अभीष्टप्रदा॰
भवेत् स्वयंभूः कुसुमैः शुक्रै रेत
स्ताम्बूलकिंतैः रसैर्भूर्जे लिखे
पी॰

हृमेरवोष्णतमिहेष्टारि गौरतंनुभिर
अर्कलाहृयावेष्टितंतथा स्ववर्णग
टिकांतस्यस्रजयेयेत्रराजवत् गुटि
कैषामंत्रादिमाराज्ञीमूर्तिरिवाप
रा मूलविद्यामयीदेविसर्वाभीष्ट
फलप्रदा शिरस्याधनदादेविक
ण्ठस्यापुत्रदायिनी वक्षस्यावा
क्प्रदादेविकटिस्याभोगदायि॰
नी हस्त्स्याबलदानिमकुक्षिस्या
रोगनाशिनी सर्वांश्रिसाधयेल्लो॰
केसर्वाभीष्टफलप्रदा गुटिकेयं
शुभाराज्ञानदेयायस्यकस्यचित्
इदंकवचमीशानिमूलविद्यामय
यं ध्रुवम् सारस्वतप्रदंलक्ष्मीपु
त्रपौत्रविवर्धनम् आयुष्करंपु
ष्टिकरंश्रीकरंचयशस्करम्

रा॰
क॰
४

5

वक्त्रैःषट्पादिं तत्राण्णं स्मार माद्रायव
र्णिनम् श्मशाने यः पठेत्सायं मः
हाचीनकमेश्वरः समायको म
हादेवि रात्रीपुत्रो भविष्यति इती
दं मम सर्वस्वं त्रैलोक्यविजयाभि
धम् कवचं मन्त्रगर्भं तु गोपनी
यं स्वयोनिवत् ॥ इति श्रीरुद्रया
मले तन्त्रे दशविद्यारहस्ये रात्रीक
वचं सम्पूर्णम् शुभमस्तु

ग.
स. ॐ श्रीगणेशाय नमः श्रीदेव्युवाच
१ ॐ भगवन्देवतत्वज्ञमंत्रतंत्रविचा-
रण: शरण्यसर्वलोकेषु शर-
ण्णागतवत्सल कथं श्रियमवा-
प्नोति लोके दारिद्र्यदुःखभाक्
मांत्रिकः भैरवेशान तन्मे गदितु-
मर्हसि श्रीभैरव उवाच या देवी
निष्कला शक्तीभगवत्परेश्वरी
सा सृजत्यवति व्यक्तं संहरिष्यति
तामसी तस्या नामसहस्रं तेन व-
क्ष्ये स्नेहेन पार्वति श्रवाच्छ्रउत्त-
मं लोके दुःखदारिद्र्यनाशनम्
परमार्थप्रदं पुण्यं परमैश्वर्यका-
रणम् सर्वागमरहस्याढ्यं सक-
लार्थप्रदीपनम् समस्तशोक-
शमनं महापातकनाशनम्

सर्वमंत्रमयंपदिव्यंराज्ञीनामसहस्र·
स्रकम् ॐअस्य श्रीभगवतीरा·
ज्ञीमंत्रनामसहस्रस्य श्रीब्रह्मा
ऋषिः गायत्रं छंदः श्रीभूतेश्व
रीराज्ञीभगवतीदेवता ह्रींबीजं
सौःशक्तिः क्लींकीलकं श्रीभो·
गापवर्गसिद्ध्यर्थे राज्ञीमंत्रनामस
हस्रस्तवपाठे विनियोगः ॐह्रीं
श्रींरांमहाराज्ञी क्लींसौः पंचद·
शाक्षरी ह्रींस्वाहाक्षरीविद्याप
राभगवतीविभा भास्वतीभद्रिका
भीमाभर्गरूपामहस्विनी मान·
नीयामनीभाद्यमनोजाद्यमनो
नवा मानदा मंत्रविद्याचमहावि
द्याषडक्षरी षट्कूटाचत्रिकूटाच
त्रयीवेदत्रयीशिखा शिवाकारा

रा. स. २

विरूपाक्षी शशिखण्डानंदिनी
महालक्ष्मी महोरस्का महौजस्का
महोदया मातंगी मोदकाहारा म
दिरारुणलोचना साध्वी शीलव
ती शालाक्ष्या कलशधारिणी
वह्निनी पद्मिनी पद्मा पद्मकिंज
ल्करञ्जिता हंसपद्मवासिनीहृ
षापानपात्रधरा धरा धराधरेन्द्र
तनयादत्तमार्हिताण्डया दया
वती महामेधा मोदिनी वाग्मिनी
गदा गदाधरार्चिता गोधा गंगा
गोदावरी गया महाप्रभावसहि
ता महोरगविभूषणा महामु
निकृतातिथ्या साध्वी मानवती म
हा बाला सरस्वती लक्ष्मी उ गौर
गीतिनाशिनी शारी शरीरमध्य

स्यावैवरींवैवरीश्वरी शिवशक्ति
ववत्तस्था कालिका त्रिपुरा पुरी
पुरारिंकुह्निमध्यस्थाम्भरारिवृन्द
येश्वरी वत्नादिराज्यदा वल्लिवाम्र
लोकुलुध्यारिणी मुण्डमालावि
नाम्बुजाक्षोभनाकर्षिणी क्षमा ब्रा
ह्मी नारायणी देवी कौमारी चाप
राजिता रुद्राणी च शची न्द्राणी वा
राही वीरसुन्दरी नारसिंही भैरवे
शी भैरवाकारभीषणा नागाल
कारशोभाढ्या नागयज्ञोपवीति
नी नागकंकणकीयूरा नागहा
रामहेश्वरी सुरारिघातिनी पूता
श्तनाशकिनी क्रिया क्रियावती
क्रीकुसुमा हाकिनी लाकिनी लया
लीलावती रसाकीर्णी नागकमा

गु॰ स १

3

मनोहरा हारकंकणशोभाढ्या·
सदानन्दा शुभंकरी प्रहासिनीम
धुमती सरसी सर्वमोहिनी महो
ग्रवपुर्वार्तावामा चारुप्रियासि
रा स्वयंमयी वेणुकरा नरार्द्रा वार
सुन्दरी वारिमध्यस्थिता वामा मावा
मनेदेशशिप्रभा शुभदा शाकरी
तु॰ शीतारवै[illegible]शिविलोचना म
दिरावारुणीकीणागीनन्दामदि
रावती वटस्था वारुणीमूर्तिव·
टजा वटवासिनी वटकी वीरसू
र्व्यांगा स्तंभिनी मोहिनी चमुन
कुरंगाकुशा हलाचवराभयकरा
कुटी पाटीरद्रुमवल्ली वटिका
वटकेश्वरी उष्ट्राकुलविभूःकीरी
रेवती रमणप्रिया रोहिणी रेवती

रम्यारमणारामहर्षिणी रमोल्ला-
सारसासारामारिणीतारिणीतडि
त्त नरीलोरिवहस्तावनोनलालत
णिप्रभा रत्नाकरप्रियांश्मारत्ना
लंकारशोभिता हकंसागदागदा
हस्तागदायरवरप्रदा षड्रसाहि
रसामालामालाभरणभूषिता
मालतीमल्लिकामोदामोदका-
हारवल्लभा वल्लभीमधुरामाया
काशीकाञ्चीललन्तिका हसन्ति
काहसन्तीचभ्रमन्तीचवसन्ति-
का हेमाम्लेर्मकरीलामाहोम
वस्त्रादणेश्वरी हमार्दहेमदासी
दासीरपालितसमर्चिता क्रीताक्री
तातपाकूराकमनीयाकुलेश्वरी
कुलवीजाकुहाराव्याकृमिलीकु

कु

रा॰
स॰ मन्दरी काश्यपी चैव काश्मीरी
४ हन्ती हारवती क्रिया धृतवस्त्रा तु
नगानिःपीठेशी वगला मुक्ति मुमु
क्ति शोभना श्रीनिरत्ना ज्वाला मुक्ति
तुतिः मलकोज्ञयिनी भोग्या भगि
भोगावती वत्सा धर्मराजपुरीस्थिता
पूर्णमत्ता मरावती श्रेयोध्यायोय॰
नीयाव् युगमाता च यक्षिणी यज्ञे
श्वरी योगगम्या योगिध्येया यशस्
स्विनी यशोवती चर्चा वंगिनी चारु
हासा चेला चला हरेश्वरी हरेस्मा
धामायिनी वायुवेगिनी सुकालि
कोणा मर्गेशी भयकूटा महाम॰
तिः केशेश्वरी च कमला कीर्तिदा।
कीर्तिवर्धिनी कठोरवाक्कुहूमूर्ति
रिन्दुबिंबसमानना चन्द्रकुंकुम

लिङ्गी कनकाचलवासिनी मा
ल्याचलसंस्थ्या हिमाद्रितनया
तनुः हिमाद्रिकुक्षिदेशस्था कु
ण्डिका कामलेश्वरी कौरकनि
गड्ढा गूढागूढगुह्यकान्तिगोपि
ता तत्त्वज्ञाना तत्त्वरूपा च वाचावाच्य १०
राज्रतिः पुरीणां मुख्यवाराही मु
मुकेशपाकृतानना श्रहोमोशी
धृतिः स्मृतिः गरिष्ठा वरीयसी
महानसी महाकाराह रासराभ
यङ्करी उग्ररूपा महाज्योतिरनि
रुद्धसरस्वती धर्मा माधर्मामु
खी श्मशाना शान्ता सन्तापहारि
णी गौरी गर्भा गोमयीगुप्ता गो
मती गुरुवाग्गम्या गीतसन्ता
पंससन्ता गुह्यहिणीग्राहिणीगु

ग॰ स॰ ५

ओं

द्रा गणप्रियागजमतिर्गात्यारीगय
मोदिनी गन्धमादनसानुस्थासला
वलकृतालया गजाननप्रियाग
माग्रासिकाग्रहवाहना गुहप्र
सूःगुहावासागहमालाविभूषणा
कौवेरीकुहकभ्रान्तिहल्कविद्या
प्रियंकरी पीतांवरापटाकाराप
ताकासृष्टिजास्तया दाक्षायणी
दक्षसुतादक्षयज्ञविनाशिनी ।
ताराचक्रस्थितातारातारीतारयीत
टिस्वला सन्ध्यात्रयीसन्धिज
रासन्धिनारूपलालिता ललि
तालोहितालंमांचमांवमा कुला
सृणिः सृतिःसमवतीसाहृास
मानामानववर्जिनी महोमयीम
नस्तुष्टिःकामयेनुस्तनातनी

सूक्ष्मरूपासूक्ष्मभूतावासास्थूलरूपा
कलावती तला तलाश्रयासिन्धु
स्रुविकालंधिकालया सौदामि
नीसूर्यादेवीमनकर्णिसमर्चिता
मन्दाकिनीचयमुनाविपाशा न
र्मदानदी गण्डकीरेवतीसिप्रावि
तस्ताचसरस्वती रेवाचैरावतीवे
दवतीसागरवासिनी देवकी
देवमाताचदेवेशीदेवसुन्दरी
दैत्यघ्नीरमनीदानवादितिर्दितिज
सुन्दरी विद्याधरीचविद्येशीवि
द्याधरजसुन्दरी मेनकाचित्र
लेखाचचित्रिणीचतिलोत्तमा
उर्वशीमोहिनीरंभाचाप्सरोगा
णसुन्दरी यक्षिणीयक्षलोके
शीनरवाहनपूजिता यक्षेन्द्र

ग्र· स· ८

6

तनयायोग्यायक्षनायकसुन्दरी ग
न्धर्वतोषितागन्धर्वासुगन्धर्वागीतत
त्परा गन्धर्वतनयाग्राणीतिगं
न्धर्वसुन्दरी मन्दोदरीकरालाक्षी
मेघनादा वरप्रदा मेघवाहनम
न्त्रेष्टा मेघमूर्तिश्राद्लसी रक्षो
दर्शीकेकसीचरक्षोनायकसु
न्दरी किन्नरीकण्ठकण्ठीचक
लकण्ठस्वना स्वया किंपुरुषीह
यवक्त्राचकोलाकिन्नरसुन्दरी
पिशाचीराजमातङ्गीउच्छिष्टप
दंष्ट्रस्थिता महापिशाचिनीचा
न्द्री पिशाचकुलसुन्दरी गुह्ये
श्वरी गुह्यरूपा गुह्यकी गुह्यकसुन्दरी
गुह्येशसिद्धिप्रदा सिद्धिवधूः सि
द्धेशीसिद्धसुन्दरी भूतेश्वरीभू

तलयाभूतयात्रीमयापद्मा भूत
भीतिरूपीभव्याभूतजाभूतसुन्द।
री पृथ्वीपार्थिवलोकेशीपृथ्वा
विसृष्टसमर्चिता वसुन्धरावसुन
तापृथिवीभूमिसुन्दरी श्रेमोपि
ततयाल्हसाजलजातीजलेष्य।
री अमूर्तिरसधीमारीजलस्था
जलसुन्दरी तेजस्विनीमहोया
धै ८ श्रीतैजसीसूर्यविंबगा सूर्यकान्तिः
स्थतेजातेजोरूपेकसुन्दरी वा।
युवाह्वावायुरुद्भवीवायुलोकेक
सुन्दरी गगनस्थाविचारेशीशून्य
रूपानिराकृतिः निराभासाभास·
मानाश्रुतिराकाशसुन्दरी द्विति·
मूर्तियरानन्तादितिमर्त्यलोकसुंद
री श्रव्यियानारत्नशोभाकरुणा॥

रा॰
सु॰ श्रीवरायुधा पाशहस्ताशोभमानाच।
७ वारुणीश्वरसुन्दरी अनिलेका रू।
विध्वंसिनिः पञ्चानिलगतिस्थितिः
प्राणापानसमानेच्छाचोदानव्या
नरूपिणी पञ्चवातगतिर्नाडीरू
पिणी वातसुन्दरी अग्निरूपावह्नि
शिखा वडवानलसन्निभा हेति
हविर्हुतभोक्तिरग्निजा वह्निसुन्द
री सोमेश्वरी सोमकला सोमपा
नपरायणा सौम्यानना सोमरू
पा सोमस्था सोमसुन्दरी सूर्यप्र
भा सूर्यमुखी सूर्यजा सूर्यसुन्दरी पूरी॰
याज्ञिकी यज्ञभागेशा यजमानव
रप्रदा याजकी यज्ञविद्या च यज
मानैकसुन्दरी आकाशगामिनी
वन्द्या शब्दजाकाशसुन्दरी मीन

प्रियामीननेत्रा मीनाशा मीनसुंद
री कूर्मपृष्ठगता कूर्मी कूर्मजा कू
र्मरूपिणी वाराही वीरसूर्[illegible]व- वंद्या
राहोद्धृतगेहणा वाराहमूर्तिर्वा
वालाढ्या वराहसुन्दरी नारसिंहा
कृतिर्देवी दुष्टदैत्यनिसूदिनी प्रह्
लादवरदा नारी नरसिंहैकसुन्दरी
वामजा वामनाकारा नारायणप
रायणा बलिदानदर्पघ्नी वामना
वामनसुन्दरी रामप्रिया रामकौ
लात्क्षत्रवंशक्षयंकरी भृगुगोत्रीरा
जकन्या रामा परशुधारिणी भार्ग
वी भार्गवश्[illegible] जमदग्निवरप्रदा
ऊद्धारयाधारिणी रात्रिर्जामदग्न्यैक-
सुन्दरी सीता लक्ष्मणसेव्या च रक्षः
कुलविना[illegible]शिनी रामप्रिया चशात्रु

श्रीशत्रुघ्नभरतेष्टदा लावण्यामृत
धाराध्वालवण्णाम्बुरत्नानिनी लो
हिताम्नायमन्त्रास्याम्नायरामारामः
सुन्दरी कुलकेशाकुलमुखी
यादवान्तकरीलया यादोगणा
र्चितायोज्याराध्याश्रीकुलसुन्द
री भुजभूषणवुद्धदेवीजिनमार्ग
परायणा जितक्रोधा जिताल^
स्याजितसेनाजितेन्द्रिया जिन
वेषधरोग्रावनीलानाभुद्दसुंद
री कालीकोलाहलप्रीताप्रेत
वाहप्रेतेश्वरी कल्किप्रियाकं
उधराकलिकालैकसुन्दरी
विष्णुमायाब्रह्ममायाशांभवी।
शववाहना इन्द्रावरजवक्षःस्था
स्याणुपत्नीपलालिनी अंभि

लीं जभ ह्रूं श्रीं वलेवमानकचाकुला
कुलाकुलपदेशानीपट्टानफलप्र
दा कुलवागीश्वरी कुल्या कुलजा
कुलसुन्दरी षडन्देश्वरा षडण्णा
लया षडण्जनेश्वरी षडण्केतनाह्वा
१४ पाँ ह्रूं श्रीं पाकशासनसुन्दरी स
र्मकोटिप्रतीकाशा सूर्यतेजोमयी
मयी लेखिनी भ्राजिता रज्जुरूपिणी
सूर्यसुन्दरी चन्द्रिका चन्द्रधाया र
ज्योत्स्ना शीतांशुसुन्दरी लोलाक्षी
वशताक्षी च सहस्राक्षी सहस्रपा
त् सहस्रशीर्षी चेन्द्राक्षी सहस्रभु
जवल्लिका कोटिरत्नांशुशोभाव
शुभ्रवस्त्राशतानना शतानन्दाप्र
तियगापिंगले भोग्रनादिनी स्व९ ॐ.
मामाह्रारकीयसैनूषगार्ग्वैसकुला

गं· स· ४

9

घोरनादा घोररुपिणी घोरान्नरुपिणी घोरल्क
काप्रुया गोपिनागूर्जरी गायत्रागा
यत्री वेदवल्लभा वल्लकीवरनादा
वनादविग्रा नदीनदी विन्दुरुपा च
क्रयोनिर्विन्दु नादस्वरूपिणी चक्रे
श्वरी भैरवेशी महाभैरववल्लभा
कालभैरवसेव्या च कल्पान्तारंग
नर्तकी प्रलयानलधूम्राभा योनि
मध्यकृतालया भूचरी खेचरी मु
द्रा नवमुद्राविलासिनी वियोगि
नी श्मशानस्था श्मशानार्चनतो
षिता भास्वराङ्गी भर्गी शिखा भर्गी
वामांगवासिनी भद्रकाली विश्व
काली श्रीकाली मेघकालिका नी
लकाली कालरात्रिः काली कामे·
शकालिका इन्द्रकाली पूर्वकाली

पश्चिमाम्नाय कालिका श्मशान·
कालिकारुद्रकालीश्रीक्रमका
लिका क्रींकालेश्वरकाली क्रीं हूं क्रीं ४
ह्रीं दक्षिणकालिका सुन्दरी·
त्रिपुरेशानी त्रिकूटा त्रिपुरार्चिता
त्रिनेत्रा त्रिपुराम्बा त्रिपुटा पुट·
भैरवी त्रिलोकजननी त्रेतामहा
त्रिपुरसुन्दरी कामेश्वरी कामक
मा ४ लाकां कामेशा सुन्दरी मत्तरी
श्वतरी देवी भुवनाभुवनेश्वरी ए
काक्षरी चतुष्कूटा त्रिकूटेशील·
येश्वरी चतुर्वर्णा चतुर्णेशी व· रे ४
र्णिता चतुरक्षरी पंचाक्षरी च
षडक्षरा षट्कूटा च सप्तक्षरी सप्ता
क्षरी नवाक्षरी परमाष्टाक्षरेश्वरी
नवमी पञ्चमी षष्ठी नागेशी चन्द्र

रा.

स. वान्तरी दशान्तरीटदशाक्षरीदेवि

१. कैकादशान्तरी द्वादशादिसंमका

शाद्वादशी द्वादशान्तरी त्रयोदशी

वेदगर्भा चै घत्रयोदशान्तरी चत

र्दशान्तरीविद्याविद्यापंचदशान्त

री षोडशीसर्वविद्येशीमहाश्रीषो

डशान्तरी महाश्रीषोडशीविद्या

विंन्नामणिमन्त्रप्रिया द्वाविंशान्त

न्तरीषणमा महाकालकुटृविनी

वज्रताराकालनतारानामनारोग्रता

रिणी कामनताराशशाङ्कतारास्प

र्शतारारसमाष्ठया रूपनारागंय

नारामहानीलसरस्वती काल

ज्वालावह्निजाज्वल्याब्रह्मज्वालाज

टाकुला विस्फुज्वालाजिह्वाशिखा

रुद्रज्वालाकरालिनी विकराल

शुष्कीदेवीकरालीभूतिभूषणा चि-
ताशय्यासना चिन्ता चिन्तामण्डल
मध्यगा भूतभैरवसेव्या च भूतभै
रवपालिनी बन्धकी बन्धमुद्रा च
भवबन्धविनाशिनी भवानी देव
देवेशी दीक्षा दीक्षितपूजिता सा
धकेशी सिद्धिदात्री साधकानन्दव
र्धिनी साधकाश्रयभूता च साध
केष्टफलप्रदा रजोवती राजसी
वरजकी च रजस्वला पुष्पप्रिया पु
ष्पवती स्वयंभूपुष्पमालिका स्व
यंभूपुष्पगन्धाढ्या पुलस्मस्त
यातिनी पात्रहस्ता हस्तापोत्रीपी
ताम्बा पीतभूषणा पिंगानना पिं
गकेशी पिंगला पिंगलेश्वरी मंग
ला मंगलेशानी सर्वमंगलमंगला

ग
स०
११

पुत्रवेक्षिणी णाशायरापज्ञायरायरा
पुण्यधात्री पुण्यमयी पुण्यलोकनि
वासिनी ह्रीटैमह्रूंकारस्थामः
कारस्था सुखोवती सवीशोभाव
ती समासमाचारपरायणा सम
वैन कलेशानी वामदेवकलाश्रि
ता सद्योजातकलादेवीशिवाघो
रकलाकृति: शर्वरी क्षीरसदृशी
क्षीरनीरविवेकिनी वितर्कनि-
लया निम्ना निमह्लिकन्यापराविका
पुरारिदयिता दीर्घा दीर्घनासा ल
भाषिणी काशिका कौशिकी-
कोशणकोशदा रूपवर्षिणी तु
ष्टिः पुष्टिः प्रजा प्रीता प्राणिकाश
जनकप्रिया प्रजावती गर्भवती ग
र्भदोषणादूषिता शुक्रवासाशु

ह्रैरूपा शुचिवासा जयावहा जा
नकीजनमजनकाजननोघ्रणन
मरा वादप्रियावाग्धुरन्तावादिना
वादस्वन्दरी वाकुन्तभिनीकीर
वाणीधीराधीराघुरन्धरी स्तनन्य
धीस्मानियेनीनिशानन्दानिशाल
या समस्तस्वविदासाताकाशांति
यिवरप्रदा वालकीवीरपानेच्छा
वस्थधात्रीवस्त्रप्रिया शुकानन्दस्थ
करस्थाशुकरूपजार्शुकप्रिया शुं
कीचशुकरहस्यावसमस्तनरका
नेका समस्तनत्वनिलया भग
रूपाभगेश्वरी भगविंवामगो ह्ला
घ्राभगलिंगस्वरूपिणी भगलि
गेश्वरीश्रीदाभगलिंगामृतस्रवा
दीशाशनाह्रीरुचिरासपानप

रा॰
स॰ यशा मधुपानमदाघूर्णापीवरांसा
१२ पंकजवसा पिलिपिलापटोलेणाकाटला
रुणालोचना ह्रीशंभुप्रियाह्री
वाम्मरलासरलायुधा संग्रामाग्र
नयास्त्रस्त्रांसहतिःस्तनकेश्वरी क
न्याकनककेशाचकामकुजानिवा
सिनी काम्बुनामतनुःकाष्टकु
ष्टरोगविनाशिनी कठोरमूर्धजा
कुलौकुलताखुधराधृतिः चर्मी
वराकूरगुवीचकोरक्षीचतुर्भु
जा चतुर्वेदप्रियाचाक्षुर्वीवसुवेग वी
कलप्रदा ब्रह्माण्डचारिणीसरू
र्तिर्ब्रह्माणी ब्रह्मसमन्ता सत्का
रकारिणी सूतिःस्पृतिःकालनिका
लता कल्पवल्लीकृशांगी च कल्प
पादपवासिनी कल्पशाखा म॰

ह्रा विद्याविद्याराज्ञी सर्वाश्रया भूति
राज्ञी विश्वराज्ञी लोकराज्ञी शिवाश्र
या ब्रह्मराज्ञी विष्णुराज्ञी रुद्रराज्ञी
जटाश्रया नागराज्ञी वंशराज्ञी वी
रराज्ञी रजःप्रिया सत्त्वराज्ञी नमो
राज्ञी गुणराज्ञी चलाचला वसुरा
ज्ञी समराज्ञी तपोराज्ञी जपप्रिया
मंत्रराज्ञी वेदराज्ञी तंत्रराज्ञी श्रुतिप्रि
या देवराज्ञी धर्मराज्ञी देसराज्ञी दया
करा कलाराज्ञी प्रजाराज्ञी तेजोरा
ज्ञी हराश्रया गजराज्ञी गदाराज्ञी
गणराज्ञी गुणाश्रया पृथ्वीराज्ञी
पयोराज्ञी सदालसा सुराराज्ञी वायुराज्ञी
याराज्ञी भीमराज्ञी भयोज्झिता त
पोराज्ञी जयाराज्ञी महाराज्ञी कुला
कृतिः वामराज्ञी जैनराज्ञी हरिरा

रा॰

स॰ ज्ञीस्फुलेश्वरी पराराज्ञीयन्त्रराज्ञीभूत

१२ राज्ञीशवासना वटुराज्ञीप्रेतराज्ञीशे

षराज्ञीशमप्रदा आकाशराज्ञीरा

13 जेशीराज्यराज्ञीरतिप्रदा पाताल

राज्ञीभूराज्ञीप्रेमराज्ञीविघ्नापहा

सिद्धराज्ञीविभाराज्ञीज्योतीराज्ञी

विभामयी भास्वद्राज्ञीचन्द्रराज्ञी

ताराराज्ञीखवासिनी ग्रहराज्ञील

ताराज्ञीहृत्त्वराज्ञीमतिप्रदा धीर

राज्ञीमनोराज्ञीमन्त्रराज्ञीचक्राष्प

लि॰ पी म[illegible]राज्ञीरत्नराज्ञीयुगराज्ञी

लि॰ म[illegible]प्रभा सिन्धुराज्ञीनदीराज्ञी

नदराज्ञीदरीस्थितिः विन्दुराज्ञी

पा॰ नादराज्ञीआत्मराज्ञीचसङ्गतिः

पुत्रराज्ञीध्यानराज्ञीलयराज्ञीस

दीश्वरी ईशानराज्ञीराज्ञीशीस्वा

ह्माज्ञीमहात्वरा वह्निराज्ञीयोग
राज्ञीयज्ञराज्ञीचिदाकृतिः जगद्रा
ज्ञीतत्वराज्ञीवाग्राज्ञीविश्वरूपिणी
पञ्चदशाक्षरीराज्ञीॐह्रींमूर्तेश्वरी
श्वरी १००० इतीदंमंत्रसर्वस्वरा
ज्ञीनामसहस्रकम् पञ्चदशाक्ष
रीतत्वंतंत्रसारंमनुप्रियम् सर्वतं
त्रमयंपुण्यंमहापातकनाशनम्
सर्वसिद्धिप्रदंलोकेसर्वरोगनि
वर्हणम् सर्वोत्पातप्रशमनंग्रह
शान्तिकरंपरम् सर्वे[illegible]प्रयंश्रा
ऽसर्वशत्रुभयापहम् सर्वदुःखौ
घशमनंसर्वशोकविनाशनम्
पठेद्वापाठयेन्नाम्नांसहस्रंशक्ति
सन्निधौ हरादेवपलायन्तेविपदः
शत्रुभीतयः राक्षसाभूतवेतालाः

रा॰
स॰ पन्नगाहरिणश्चैव: पठनाद्विद्वनश्या
१४ श्रमहाकालादिवप्रजाः श्रवणा॰
15 मातकं नश्येच्छ्रावयेद्यः समागवा
न् अश्वमेधसहस्रस्य वाजिपेयय॰
स्य कोटयः सहस्रनामपाठस्य रा
जस्तूयशतस्यैवं गंगास्नानसह
स्रस्य चान्द्रायणायुतस्य च नम
कृच्छ्रकलन्दस्य पराकस्यायुतस्य
च सहस्रना[illegible]ठस्य कलां नार्ह
न्ति षोडशीम् स[illegible]स्ति हीश्वरं सा
ध्यराज्ञीनामसहस्रकम् मंत्रग
र्भं पठेद्यस्तु राज्यकामो महेश्वरि
वर्षमेकं शतावर्तं महावीनक॰
माकुलः शाक्तिपूजापरो राजोस
लभेद्राज्यमीश्वरि १३ कामोप
ठेत्सायं चिन्तामस्यानुलेपनः दि

गंबरो मुक्तकेशः शानावर्तंमहे
श्वरि श्मशाने ठलभेत्संत्रसाक्षाद्दै
श्रवणोपमम् परदारार्चनरतोभ
गविंबंस्मरन्मुखैः पठेन्नाममसह
स्रंतुवरस्तकामो लभेद्धनम् गोत्रो
बारत्रयंदेविपठेन्नाममसहस्रकम
मृत्युविहरन्निर्विष्टःक्षीरपात्रपरा
यणः सभेसिद्धमुर्नौराज्ञीवरदां
देविपश्यति क्षीरं [illegible] वीणमन्त्रमो पं४
वीरपानरसालसः यःपठेत्परयाम
स्याराज्ञीनाममसहस्रकम् सम
योमुच्यतेघोरान्महापातककजा
द्भयात् यःपठेत्साधकोभक्त्या
शक्तिवक्त्रःकृतासनः शुक्रोत्ता
रणकालेनतस्याद्र्लोकसिद्धा
यः यःपठेन्निशिपिवकाग्रेमरस्त्री

रा॰ स॰ १५

15

ध्यानतत्परः सुरासवरसानन्दी सं-
लभेत्सुगुणजयम् इदं नामसहस्रं
तु सर्वमन्त्रमयं शिवे भूर्जे त्वविलि-
खेद्रात्रौ चक्रार्चनसमागमे अष्टग-
न्धेन पूतेन वेष्टयेत्स्वर्णपत्रके धा-
रयेत्कण्ठदेशे तु सर्वसिद्धिः प्रजा-
यते यो धारयेन्महाराज्ञां सर्वदेवा-
तिदुर्लभम् रणे राजकुले द्यूते चौ-
रोग्राद्युपद्रवे सम्प्राप्नोति जयं स-
द्यस्साधको धीरनायकः श्रीचक्र-
पूजयेद्यस्तु धारयेद्धममस्तके प-
ठेन्नामसहस्रं तु स्तोत्रं मन्त्रात्मकं
तथा किं किं न लभते कामं देवा-
नामपि दुर्लभम् सुरापात्रं ततः तं
संविशुद्धर्णमीनमांसकम् नव
कमासमायोगो मुद्रावीणारवः

प्रिये सत्यं गोगुरुसान्निध्यं राज्ञी
श्रीचक्रमग्रतः यस्मै देवि समपवः
स्याद्योगी ब्रह्मविदीश्वरः इदं र
हस्यं परमं भक्त्या तव मयोदितम्
अप्रकाश्यमदातव्यं नदेयं यस्य क
स्यचित् अमशिष्याय दुष्टाय दु
र्जनाय दुरात्मने गुरुभक्तिविही
नाय स्वशास्त्रीनिन्दकाय च नास्ति
काय कुशीलाय नेदेयं तत्त्वद
र्शिभिः देयं शिष्याय शान्ताय भ
क्ताय हितवादिने दीक्षिताय कु
लीनाय राज्ञीभक्तिरताय च द
द्याद्भोगापवर्गं त्वलभेत्साधक
सत्तमः इति नाम सहस्रन्तु रा
ज्ञ्याः शिवमुखोदितम् अत्यन्त
दुर्लभं गोप्यं गोपनीयं स्वयोनि

वत्

रा॰
स॰ इति श्रीरुद्रयामले तंत्रे दशविद्यार
९६ हस्ये श्रीराज्ञीनामसहस्रं संपूर्ण
म् ॥ शुभमस्तु सर्वजगताम्

10

रा·
स्तो
१

ॐश्रीगणेशायनमः श्रीभैरवउवाच
ॐअधुनाकथयिष्यामिस्तोत्रराजमप
राजितकम् मूलमंत्रमयंदिव्यंतत्वम्
तंमनोहरम् राज्ञीप्रियंपापहरंस्व
ल्पपूजाफलप्रदम् जपलक्षसमं
स्तोत्रंध्यानकोटिसमंप्रिये राज्ञी
स्तोत्रस्यदेवेशिब्रह्माऋषिरुदाहृ
तः गायत्रंछन्दइत्युक्तंश्रीराज्ञी
देवतेरिता मायाबीजंशरच्छक्तिः
कामःकीलकमीश्वरि भोगापव
र्गसिद्ध्यर्थेविनियोगःप्रकीर्तितः
ॐअस्यश्रीमहाराज्ञीस्तवराजस्य
श्रीब्रह्माऋषिः गायत्रंछन्दः
श्रीराज्ञीभूतेश्वरीदेवता ह्रींबीजं
स्रौंःशक्तिः क्लींकीलकम् ॐश्री
भोगापवर्गसिद्ध्यर्थे श्रीराज्ञीस्त

वपाठेविनियोगः अथध्यानम् ॐ
उद्यद्दिवाकरसहस्ररुचिंत्रिनेत्रा
सिंदूरस्नेपरिगताम्बरगोपवीता
म् खड्गांबुजाढ्यकलशाम्रतपा
त्रहस्तांराज्ञींभजामिविधहस्रहृद
नारविन्दाम् ॐकारमिन्दुकलि
कावतंसितवेदसागरमणिंम
नोहरम् योजपेत्तुबसिरत्नमा
लयाराज्यमाप्नुलभतेससाधकः
भूतिबिन्दुनवविन्दुमणिंडतंनाद
विन्दुललितंजपेत्तयः वारमे
कतरुवारणस्थितोजेध्यतिस
यमयानरीमणि २ रमांजपेद्यो
भुवनेशिमंत्रीवन्मंत्रमष्टोमद
नोपतमः रमांसमालिंग्यविमा
नचारीलीलांभजेनन्दनवाटि

गं॰
स्तो॰
२

कायाम् ३ वह्निवीजमस्तिमादिमि
न्दुबिंदुविंबशशिखण्डमखण्डनम्
यो जपेन्निशि यतो भिलाषवान्स्या
दनाङ्गवति विजितद्विपम: ४ का
मराजमममाभिवन्दितं यो जपे
न्नियुवनेतु मालया तस्य याति
वशतां सुरांगना किं पुनर्जगति
भूपरांगना: ५ शंकिमप्यायो
जपेच्छक्तिपूजाकाले कालीपा
दपद्मार्पितान्त: नर्कं तस्य मेर॰
वकादृतामूर्ति विरूपा वरूपा: स्वर्गता
वाशचीव ६ भगवैसेतथा रा॰
सेनाममंत्रमिति स्मरेत् यो देवि
तस्य वर्णः स्त्रैभैरव स्पष्टसिद्धय:
मायागांमन्त्रा यदि मायके नूतज
पेन्महेश्वानिशि वालयस्य: तेदे

वदेवीं परमार्थराज्ञीपद्मेपत्नसमयो।
वरसिद्धिदात्रीम् ८ ठठयंयदिजप
त्रिशाद्वयेत्वीरभुकस्वतटिनीत
टस्थितः जितस्वविस्वकमलास
नेष्वगायान्तिदेवि वशानांतदाव्द
णान् ९ भृगेहवृत्तित्रयनागपा
त्रपद्मपयोयपद्मकविन्दुविंबे नि
षेदुषीराजकुलाधिदेवीं राज्ञी
मजेराजकुलावतंसाम् १० दे
विश्रीमूनपात्रिप्रवरगुणमये
निष्कलेनिर्गुणोमे मायेमातः
शरण्ये गिरिवरतनये चिन्मये
नेत्ररूपे दुर्गेचण्डिप्रमत्तेत्रिपु
रविजयिनिस्मेरवक्त्रेवरेण्ये का
रुण्याब्धिप्रशास्त्रेस्वरदितिजनु
तेराज्ञिमेत्वंप्रसीद ११ इतिस्तो
वै

रा॰
स्तो
३
3

त्वं मन्त्रस्फुरणकरुणानन्दनिलय
पठेद्यस्त्वां प्रातस्तवनिशि स तेयो
मन्त्रमयम् भवेत्सर्वैर्भूमीन्द्रप
मुकुटनीराजितपदो मतो मुक्ति
सार्थ लोके स्तवभवनमाप्नोति वरदे ॥२
इति राज्ञ्याः परंतत्त्वपञ्चाङ्गं म
खिलं शिवे सर्वस्वं मे रहस्यं मे
सर्वसारस्वतप्रदम् ॥३ ज्ञान
न्दवर्धनं शलं परमैश्वर्यकारण
म् भोगापवर्गदं पुण्यं दारिद्र
भयनाशनम् ॥४ पञ्चाङ्गम
खिलं देव्या न वक्तव्यं दुरात्म
ने तव भक्त्या मया ख्यातं गो॰
पनीयं प्रयत्नतः ॥५ श्रीदेव्यु
वाच भगवन्करुणाम्भोधे का
नाभिभवतायुना पञ्चाङ्गं

कथनेनास्याशास्त्राद्व्याम हेश्वर
दास्यास्मि तव भक्तास्मि किमन्य-
त्कथयामि ते १८ श्रीभैरव उवा
च इदं रहस्यं सर्वस्वं राज्ञीपञ्चा
ङ्ग मीश्वरि कौलानां सिद्धिदं वा
माङ्गोपनीयं स्वयोनिवत् १९
इति श्रीरुद्रयामले तन्त्रे दशवि-
द्यारहस्ये श्रीराज्ञीस्तवः सम्पू-
र्णम् ॥ शुभमस्तु सर्वजगता
म श्रीराज्ञीपञ्चाङ्गं सम्पूर्णम्

श्रीनगरे १९५० विक्रम

२
२०
४
१५
४

३१